श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ एकोनचत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोनचत्वारिंशः सर्गः ॥

## राजभिः श्रीरामायोपहारस्य प्रेषणं तमादाय श्रीरामेण स्वमित्रेभ्यो वानरादिभ्यस्तस्य वितरणं वानरादीनां तत्र सुखेनावस्थानम्

ते प्रयाता महात्मानः पार्थिवास्ते प्रहृष्टवत्।
गजवाजिसहस्रौघैः कम्पयन्तो वसुन्धराम्॥ **7.39.1** ॥

अक्षौहिण्यो हि तत्रासन् राघवार्थे समुद्यताः।
भरतस्याज्ञयानेकाः प्रहृष्टबलवाहनाः॥ **7.39.2** ॥

ऊचुस्ते च महीपाला बलदर्पसमन्विताः।
न राम रावणं युद्धे पश्यामः पुरतः स्थितम्॥ **7.39.3** ॥

भरतेन वयं पश्चात् समानीता निरर्थकम्।
हता हि राक्षसाः क्षिप्रं पार्थिवैः स्युर्न संशयः॥ **7.39.4** ॥

रामस्य बाहुवीर्येण रक्षिता लक्ष्मणस्य च।
सुखं पारे समुद्रस्य युध्येम विगतज्वराः॥ **7.39.5** ॥

एताश्चान्याश्च राजानः कथास्तत्र सहस्रशः।
कथयन्तः स्वराज्यानि जग्मुर्हर्षसमन्विताः॥ **7.39.6** ॥

स्वानि राज्यानि मुख्यानि ऋद्धानि मुदितानि च।
समृद्धधनधान्यानि पूर्णानि वसुमन्ति च॥ **7.39.7** ॥

यथापुराणि ते गत्वा रत्नानि विविधान्यथ।
रामस्य प्रियकामार्थमुपहारं नृपा ददुः ॥ **7.39.8** ॥

अश्वान् यानानि रत्नानि हस्तिनश्च मदोत्कटान्।
चन्दनानि च मुख्यानि दिव्यान्याभरणानि च ॥ **7.39.9** ॥

मणिमुक्ताप्रवालांस्तु दास्यो रूपसमन्विताः।
अजाविकं च विविधं रथांस्तु विविधान् बहून् ॥ **7.39.10** ॥

भरतो लक्ष्मणश्चैव शत्रुघ्नश्च महाबलः।
आदाय तानि रत्नानि स्वां पुरीं पुनरागताः ॥ **7.39.11** ॥

आगम्य च पुरीं रम्यामयोध्यां पुरुषर्षभाः।
तानि रत्नानि चित्राणि रामाय समुपानयन् ॥ **7.39.12** ॥

प्रतिगृह्य च तत् सर्वं रामः प्रीतिसमन्वितः।
सुग्रीवाय ददौ राज्ञे महात्मा कृतकर्मणे ॥ **7.39.13** ॥

विभीषणाय च ददौ तथान्येभ्योऽपि राघवः।
राक्षसेभ्यः कपिभ्यश्च यैर्वृतो जयमाप्तवान् ॥ **7.39.14** ॥

ते सर्वे रामदत्तानि रत्नानि कपिराक्षसाः।
शिरोभिर्धारयामासुर्भुजेषु च महाबलाः ॥ **7.39.15** ॥

हनूमन्तं च नृपतिरिक्ष्वाकूणां महारथः।
अङ्गदं च महाबाहुमङ्कमारोप्य वीर्यवान् ॥ **7.39.16** ॥

रामः कमलपत्राक्षः सुग्रीवमिदमब्रवीत्।
अङ्गदस्ते सुपुत्रोऽयं मन्त्री चाप्यनिलात्मजः ॥ **7.39.17** ॥

सुग्रीवमन्त्रिते युक्तौ मम चापि हिते रतौ।
अर्हतो विविधां पूजां त्वत्कृते वै हरीश्वर ॥ **7.39.18** ॥

इत्युक्त्वा व्यपमुच्याङ्गाद् भूषणानि महायशाः।
स बबन्ध महार्हाणि तदाङ्गदहनूमतोः ॥ **7.39.19** ॥

आभाष्य च महावीर्यान् राघवो यूथपर्षभान्।
नीलं नलं केसरिणं कुमुदं गन्धमादनम् ॥ **7.39.20** ॥

सुषेणं पनसं वीरं मैन्दं द्विविदमेव च।
जाम्बवन्तं गवाक्षं च विनतं धूम्रमेव च ॥ **7.39.21** ॥

बलीमुखं प्रजङ्घं च सन्नादं च महाबलम्।
दरीमुखं दधिमुखमिन्द्रजानुं च यूथपम् ॥ **7.39.22** ॥

मधुरं श्लक्ष्णया वाचा नेत्राभ्यामापिबन्निव।
सुहृदो मे भवन्तश्च शरीरं भ्रातरस्तथा ॥ **7.39.23** ॥

युष्माभिरुद्धृतश्चाहं व्यसनात् काननौकसः।
धन्यो राजा च सुग्रीवो भवद्भिः सुहृदां वरैः ॥ **7.39.24** ॥

एवमुक्त्वा ददौ तेभ्यो भूषणानि यथार्हतः।
वज्राणि च महार्हाणि सस्वजे च नरर्षभः ॥ **7.39.25** ॥

ते पिबन्तः सुगन्धीनि मधूनि मधुपिङ्गलाः।
मांसानि च सुमृष्टानि मूलानि च फलानि च ॥ **7.39.26** ॥

एवं तेषां निवसतां मासः साग्रो ययौ तदा।
मुहूर्तमिव ते सर्वे रामभक्त्या च मेनिरे ॥ **7.39.27** ॥

रामोऽपि रेमे तैः सार्धं वानरैः कामरूपिभिः।
राक्षसैश्च महावीर्यैर्ऋक्षैश्चैव महाबलैः ॥ **7.39.28** ॥

एवं तेषां ययौ मासो द्वितीयः शिशिरः सुखम्।
वानराणां प्रहृष्टानां राक्षसानां च सर्वशः ॥ **7.39.29** ॥

**इक्ष्वाकुनगरे रम्ये परां प्रीतिमुपासताम्।**
**रामस्य प्रीतिकरणैः कालस्तेषां सुखं ययौ॥ 7.39.30 ॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकोनचत्वारिंशः सर्गः॥